QQ9HBN

**पञ्चमः पाठः**

# प्रत्यभिज्ञानम्

*प्रस्तुत पाठ भासरचित 'पञ्चरात्रम्' नामक नाटक का अंश है। इसमें महाभारत के विराट पर्व की कथा है। अपने अज्ञातवास में पाण्डव वेष बदलकर राजा विराट के राज्य में रह रहे थे। दुर्योधन आदि कौरव वीरों ने राजा विराट की गायों का अपहरण कर लिया। राजा विराट का पुत्र उत्तर है। वह बृहन्नला के छद्मवेष में रहनेवाले अर्जुन को अपना सारथि बनाता है और कौरवों से युद्ध करने जाता है। कौरवों की ओर से अर्जुन का पुत्र अभिमन्यु भी युद्ध करता है। युद्ध में कौरवों की पराजय होती है। इसी बीच विराट को सूचना मिलती है कि वल्लभ के छद्मवेष में रहनेवाले भीम ने रणभूमि में अभिमन्यु को पकड़ लिया है। अभिमन्यु भीम तथा अर्जुन को नहीं पहचान पाता और उनसे उग्र होकर बातचीत करता है। दोनों अभिमन्यु को महाराज विराट के समक्ष प्रस्तुत करते हैं। अभिमन्यु उन्हें प्रणाम नहीं करता। उसी समय राजकुमार उत्तर वहाँ पहुँचता है। वह अर्जुन तथा भीम आदि पाण्डवों के छद्मवेष का रहस्योद्घाटन करता है।*



भटः — जयतु महाराजः।

राजा — अपूर्व इव ते हर्षो ब्रूहि केनासि विस्मितः ?

भटः — अश्रद्धेयं प्रियं प्राप्तं सौभद्रो ग्रहणं गतः।।

राजा — कथमिदानीं गृहीतः ?

भटः — रथमासाद्य निश्शङ्कं बाहुभ्यामवतारितः।
(प्रकाशम्) इत इतः कुमारः।

अभिमन्युः — भोः को नु खल्वेषः? येन भुजैकनियन्त्रितो बलाधिकेनापि न पीडितः अस्मि।

बृहन्नला — इत इतः कुमारः।

अभिमन्युः — अये! अयमपरः कः विभात्युमावेषमिवाश्रितो हरः।

बृहन्नला — आर्य, अभिभाषणकौतूहलं मे महत्। वाचालयत्वेनमार्यः।

भीमसेनः — (अपवार्य) बाढम् (प्रकाशम्) अभिमन्यो!

अभिमन्युः – अभिमन्युर्नाम ?

भीमसेनः – रुष्यत्येष मया त्वमेवैनमभिभाषय।

बृहन्नला – अभिमन्यो!

अभिमन्युः – कथं ? कथम्? अभिमन्युर्नामाहम्। भोः! किमत्र विराटनगरे क्षत्रियवंशोद्भूताः नीचैः अपि नामभिः अभिभाष्यन्ते अथवा अहं शत्रुवशं गतः। अतएव तिरस्क्रियते।

बृहन्नला – अभिमन्यो! सुखमास्ते ते जननी ?

अभिमन्युः – कथं कथम् ? जननी नाम ? किं भवान् मे पिता अथवा पितृव्यः ? कथं मां पितृवदाक्रम्य स्त्रीगतां कथां पृच्छसे ?

बृहन्नला – अभिमन्यो! अपि कुशली देवकीपुत्रः केशवः ?

अभिमन्युः – कथं कथम्? तत्रभवन्तमपि नाम्ना। अथ किम् अथ किम् ?

(उभौ परस्परमवलोकयतः)

अभिमन्युः – कथमिदानीं सावज्ञमिव मां हस्यते ?

बृहन्नला – न खलु किञ्चित्।

**पार्थं पितरमुद्दिश्य मातुलं च जनार्दनम्।**
**तरुणस्य कृतास्त्रस्य युक्तो युद्धपराजयः।।**

अभिमन्युः – अलं स्वच्छन्दप्रलापेन! अस्माकं कुले आत्मस्तवं कर्तुमनुचितम्। रणभूमौ हतेषु शरान् पश्य, मदृते अन्यत् नाम न भविष्यति।

बृहन्नला – एवं वाक्यशौण्डीर्यम्। किमर्थं तेन पदातिना गृहीतः ?

अभिमन्युः – अशस्त्रं मामभिगतः। पितरम् अर्जुनं स्मरन् अहं कथं हन्याम्। अशस्त्रेषु मादृशाः न प्रहरन्ति। अतः अशस्त्रोऽयं मां वञ्चयित्वा गृहीतवान्।

राजा – त्वर्यतां त्वर्यतामभिमन्युः।

बृहन्नला – इत इतः कुमारः। एष महाराजः। उपसर्पतु कुमारः।

अभिमन्युः – आः। कस्य महाराजः ?

राजा – एह्येहि पुत्र! कथं न मामभिवादयसि ? (आत्मगतम्) अहो! उत्सिक्तः खल्वयं क्षत्रियकुमारः। अहमस्य दर्पप्रशमनं करोमि। (प्रकाशम्) अथ केनायं गृहीतः ?

भीमसेनः – महाराज! मया।

अभिमन्युः – अशस्त्रेणेत्यभिधीयताम्।

| | | |
|---|---|---|
| भीमसेनः | – | शान्तं पापम्। धनुस्तु दुर्बलैः एव गृह्यते। मम तु भुजौ एव प्रहरणम्। |
| अभिमन्युः | – | मा तावद् भोः! किं भवान् मध्यमः तातः, यः तस्य सदृशं वचः वदति। |
| | | (ततः प्रविशत्युत्तरः) |
| उत्तरः | – | तात! अभिवादये! |
| राजा | – | आयुष्मान् भव पुत्र। पूजिताः कृतकर्माणो योधपुरुषाः। |
| उत्तरः | – | पूज्यतमस्य क्रियतां पूजा। |
| राजा | – | पुत्र! कस्मै ? |
| उत्तरः | – | इहात्रभवते धनञ्जयाय। .... व्यपनयतु भवाञ्छङ्काम्। अयमेव अस्ति धनुर्धरः धनञ्जयः। |
| बृहन्नला | – | यद्यहं अर्जुनः तर्हि अयं भीमसेनः अयं च राजा युधिष्ठिरः। |
| अभिमन्युः | – | इहात्रभवन्तो मे पितरः। तेन खलु .......... |
| | | (इति क्रमेण सर्वान् प्रणमति, सर्वे च तम् आलिङ्गन्ति।) |

## शब्दार्थाः

| | | |
|---|---|---|
| प्रत्यभिज्ञानम् | – | पहिचान |
| अपूर्वः | – | जो पहले न हुआ हो |
| अश्रद्धेयम् | – | श्रद्धा के अयोग्य |
| सौभद्रः | – | अभिमन्यु |
| आसाद्य | – | पाकर, पहुँचकर |
| निश्शङ्कम् | – | बिना किसी हिचक के |
| भुजैकनियन्त्रितः | – | एक ही हाथ से पकड़ा गया |
| विभाति | – | सुशोभित होता है |
| कौतूहलम् | – | जानने की उत्कण्ठा |
| अपवार्य | – | हटाकर |
| रुष्यति | – | क्रोधित होता है |
| वाचालयतु | – | बोलने को प्रेरित करें |

| | | |
|---|---|---|
| तिरस्क्रियते | – | उपेक्षा की जाती है |
| पितृव्यः | – | चाचा |
| अवलोकयतः | – | देखते हैं (द्विवचन) |
| कृतास्त्रस्य | – | अस्त्रविद्या से संपन्न व्यक्ति का |
| अलम् | – | निषेधार्थ में तृतीया विभक्ति के साथ |
| आत्मस्तवम् | – | आत्मप्रशंसा |
| सावज्ञम् | – | उपेक्षा करते हुए |
| वाक्शौण्डीर्यम् | – | वाणी की वीरता |
| पदातिः | – | पैदल चलनेवाला |
| उपसर्पतु | – | पास जाओ |
| एहि | – | आओ |
| उत्सिक्तः | – | गर्व से युक्त |
| दर्प–प्रशमनम् | – | घमंड को शान्त करना |
| गृहीतः | – | पकड़ा गया |
| मध्यमः | – | बीच का, यहाँ भीम के लिए |
| तातः | – | पिता |
| प्रहरणम् | – | हथियार |
| व्यपनयतु | – | दूर करें |

## अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –**

(क) भीमसेनेन कः गृहीतः ?

(ख) अभिमन्युः कथं गृहीतः आसीत् ?

(ग) भीमसेनेन बृहन्नलया च पृष्टः अभिमन्युः किमर्थम् उत्तरं न ददाति ?

**2. अधोलिखितवाक्येषु प्रकटितभावं चिनुत –**

(क) भोः को नु खल्वेषः ? येन भुजैकनियन्त्रितो बलाधिकेनापि न पीडितः अस्मि।

(विस्मयः, भयम्, जिज्ञासा)

(ख) कथं कथं! अभिमन्युर्नामाहम्। (आत्मप्रशंसा, स्वाभिमानः, दैन्यम्)

(ग) कथं मां पितृवदाक्रम्य स्त्रीगतां कथां पृच्छसे ? (लज्जा, क्रोधः प्रसन्नता)

(घ) धनुस्तु दुर्बलैः एव गृह्यते मम तु भुजौ एवं प्रहरणम्। (अन्धविश्वासः, शौर्यम्, उत्साहः)

**3. यथास्थानं रिक्तस्थानपूर्तिं कुरुत –**

| | | | |
|---|---|---|---|
| (क) खलु | + एषः | = | ............................... |
| (ख) विभाति | + .................. | = | विभात्युमावेषम् |
| (ग) .................. | + एनम् | = | वाचालयत्वेनम् |
| (घ) त्वमेव | + एनम् | = | ............................... |
| (ङ.) यातु | + ...................... | = | यात्विति |
| (च) ................ | + इति | = | धनञ्जयायेति |

**4. अधोलिखितानि वचनानि कः कं प्रति कथयति –**

| | कः | कं प्रति |
|---|---|---|
| **यथा** – आर्य, अभिभाषणकौतुहलं मे महत्। | बृहन्नला | भीमसेनम् |
| (क) कथमिदानीं सावज्ञमिव मां हस्यते? | .................. | .................. |
| (ख) अशस्त्रेणेत्यभिधीयताम्। | .................. | .................. |
| (ग) पूज्यतमस्य क्रियतां पूजा। | .................. | .................. |
| (घ) शान्तं पापम्! धनुस्तु दुर्बलैः एव गृह्यते। | .................. | .................. |

**5. अधोलिखितानि स्थूलानि सर्वनामपदानि कस्मै प्रयुक्तानि –**

(क) वाचालयतु एनम् आर्यः।

(ख) किमर्थं तेन पदातिना गृहीतः ?

(ग) कथं न माम् अभिवादयसि।

(घ) मम तु भुजौ एव प्रहरणम्।

(ङ.) अपूर्व इव ते हर्षो ब्रूहि केन विस्मितः ?

**6. (क) अधोलिखितेभ्यः पदेभ्यः उपसर्गान् विचित्य लिखत –**

| | पदानि | | उपसर्गः |
|---|---|---|---|
| **यथा** – | आसाद्य | – | आ |
| | अवतारितः | – | ...................... |
| | विभाति | – | ...................... |

| | | |
|---|---|---|
| अभिभाषय | – | ...................... |
| उद्भूताः | – | ...................... |
| तिरस्क्रियते | – | ...................... |
| प्रहरन्ति | – | ...................... |
| उपसर्पतु | – | ...................... |
| परिरक्षिताः | – | ...................... |
| प्रणमति | – | ...................... |

**(ख) उदाहरणमनुसृत्य कोष्ठकदत्तपदेषु पञ्चमीविभक्तिं प्रयुज्य वाक्यानि पूरयत –**

यथा – श्मशानाद् धनुरादाय अर्जुनः आगतः। (श्मशान)

पाठान् पठित्वा सः .......................... आगतः। (विद्यालय)

.......................... पत्राणि पतन्ति। (वृक्ष)

गङ्गा .......................... निर्गच्छति। (हिमालय)

क्षमा .......................... फलानि आनयति। (आपणम्)

.......................... बुद्धिनाशो भवति। (स्मृतिनाश)

QQIDDB

## योग्यताविस्तारः

### अन्वय और हिन्दी भावार्थ

**पार्थं पितरमुद्दिश्य मातुलं च जनार्दनम् ।**
**तरुणस्य कृतास्त्रास्य युक्तो युद्धपराजयः।।**

अज्ञातवास में बृहन्नला के रूप में अर्जुन को बहुत समय के बाद पुत्र–मिलन का अवसर प्राप्त हुआ। वह अपने पुत्र से बात करना चाहता है, परन्तु अपने अपहरण से क्षुब्ध अभिमन्यु उनके साथ बात करना ही नहीं चाहता। तब अर्जुन उसे उत्तेजित करने की भावना से इस प्रकार के व्यंग्यात्मक वचन कहते हैं –

तुम्हारे पिता अर्जुन हैं, मामा श्री कृष्ण हैं तथा तुम अस्त्रशस्त्रविद्या से सम्पन्न होने के साथ ही साथ तरुण भी हो, तुम्हारे लिए युद्ध में परास्त होना उचित है।